श्री वैभवलक्ष्मी अर्चना अथवा महालक्ष्मीस्तवं

श्रीपार्वति सरस्वति महालक्ष्मि नमोऽस्तु ते ।
विष्णुप्रिये महामाये महालक्ष्मि नमोऽस्तु ते ।
कमले विमले देवि महालक्ष्मि नमोऽस्तु ते ।
कारुण्यनिलये देवि महालक्ष्मि नमोऽस्तु ते ।
दारिद्र्यदुःखशमनि महालक्ष्मि नमोऽस्तु ते ।
श्रीदेवि नित्यकल्याणि महालक्ष्मि नमोऽस्तु ते ।
समुद्रतनये देवि महालक्ष्मि नमोऽस्तु ते ।
राजलक्ष्मि राज्यलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
वीरलक्ष्मि विश्वलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
मूकहंत्रि मंत्ररूपे महालक्ष्मि नमोऽस्तु ते । 10
महिषासुरसंहर्त्रि महालक्ष्मि नमोऽस्तु ते ।
मधुकैटभविद्रावे महालक्ष्मि नमोऽस्तु ते ।
शंखचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ।
वैकुंठहृदयावासे महालक्ष्मि नमोऽस्तु ते ।
पक्षींद्रवाहने देवि महालक्ष्मि नमोऽस्तु ते ।
धान्यरूपे धान्यलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
स्वर्णरूपे स्वर्णलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
वित्तरूपे वित्तलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
हरिप्रिये वेदरूपे महालक्ष्मि नमोऽस्तु ते ।
फलरूपे फलधात्रि महालक्ष्मि नमोऽस्तु ते । 20
निस्तुले निर्मले नित्ये महालक्ष्मि नमोऽस्तु ते ।
रत्नरूपे रत्नलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
क्षीररूपे क्षीरधात्रि महालक्ष्मि नमोऽस्तु ते ।
वेदरूपे नादरूपे महालक्ष्मि नमोऽस्तु ते ।
प्राणरूपे प्राणमूर्ते महालक्ष्मि नमोऽस्तु ते ।
प्रणवानंदमहसे महालक्ष्मि नमोऽस्तु ते ।
ब्रह्मरूपे ब्रह्मधात्रि महालक्ष्मि नमोऽस्तु ते ।
जातवेदस्वरूपिण्यै महालक्ष्मि नमोऽस्तु ते ।
आधारशल्कनिलये महालक्ष्मि नमोऽस्तु ते ।

सुषुम्नासुषिरांतस्थे महालक्ष्मि नमोऽस्तु ते । 30
योगानंदप्रदायिन्यै महालक्ष्मि नमोऽस्तु ते ।
सौंदर्यरूपिणि देवि महालक्ष्मि नमोऽस्तु ते ।
सिद्धलक्ष्मि सिद्धरूपे महालक्ष्मि नमोऽस्तु ते ।
सर्वसंतोषसद्रूपे महालक्ष्मि नमोऽस्तु ते ।
तुष्टिदे पुष्टिदे देवि महालक्ष्मि नमोऽस्तु ते ।
राजराजार्चितपदे महालक्ष्मि नमोऽस्तु ते ।
सर्वस्वरूपे दिव्यांगि महालक्ष्मि नमोऽस्तु ते ।
चारित्र्यदिव्यशुद्धांगि महालक्ष्मि नमोऽस्तु ते ।
वेदगुह्ये शुभे देवि महालक्ष्मि नमोऽस्तु ते ।
धर्मार्थकामरूपिण्यै महालक्ष्मि नमोऽस्तु ते । 40
मोक्षसाम्राज्यनिलये महालक्ष्मि नमोऽस्तु ते ।
सर्वगम्ये सर्वरूपे महालक्ष्मि नमोऽस्तु ते ।
मोहिनि मोहरूपिण्यै महालक्ष्मि नमोऽस्तु ते ।
पंचभूतांतरालस्थे महालक्ष्मि नमोऽस्तु ते ।
नारायणप्रियतमे महालक्ष्मि नमोऽस्तु ते ।
कारणि कार्यरूपिण्यै महालक्ष्मि नमोऽस्तु ते ।
अनंततल्पशयने महालक्ष्मि नमोऽस्तु ते ।
लोकैकजननि वंद्ये महालक्ष्मि नमोऽस्तु ते ।
शंभुरूपे शंभुमुद्रे महालक्ष्मि नमोऽस्तु ते ।
ब्रह्मरूपे ब्रह्ममुद्रे महालक्ष्मि नमोऽस्तु ते । 50
विष्णुरूपे विष्णुमाये महालक्ष्मि नमोऽस्तु ते ।
आज्ञाचक्राब्जनिलये महालक्ष्मि नमोऽस्तु ते ।
फकार रेफ शक्त्याभे महालक्ष्मि नमोऽस्तु ते ।
हृदयांबुजदीपांगि महालक्ष्मि नमोऽस्तु ते ।
विष्णुग्रंथि विशालांगि महालक्ष्मि नमोऽस्तु ते ।
आधारमूलनिलये महालक्ष्मि नमोऽस्तु ते ।
ब्रह्मग्रंथि प्रकाशांगि महालक्ष्मि नमोऽस्तु ते ।
कुंडलीशयनानंदि महालक्ष्मि नमोऽस्तु ते ।
जीवात्मारूपिणि मातः महालक्ष्मि नमोऽस्तु ते ।
स्थूलसूक्ष्मप्रकाशस्थे महालक्ष्मि नमोऽस्तु ते । 60

ब्रह्मांडभांडजननि महालक्ष्मि नमोऽस्तु ते ।
अश्वत्थवृक्षसंतुष्टे महालक्ष्मि नमोऽस्तु ते ।
कारुण्यपूर्णे श्रीदेवि महालक्ष्मि नमोऽस्तु ते ।
मूर्तित्रयस्वरोपिण्यै महालक्ष्मि नमोऽस्तु ते ।
भानुमंडलमध्यस्ते महालक्ष्मि नमोऽस्तु ते ।
सूर्यप्रकाशरूपिण्यै महालक्ष्मि नमोऽस्तु ते ।
चंद्रमंडलमध्यस्ते महालक्ष्मि नमोऽस्तु ते ।
वह्निमंडलमध्यस्ते महालक्ष्मि नमोऽस्तु ते ।
पीतांबरधरे देवि महालक्ष्मि नमोऽस्तु ते ।
दिव्याभरणशोभाँगे महालक्ष्मि नमोऽस्तु ते । 70
ब्रह्मणाऽऽराधिते देवि महालक्ष्मि नमोऽस्तु ते ।
नारसिंहिकृपासिंधो महालक्ष्मि नमोऽस्तु ते ।
वरदे मंगलमान्ये महालक्ष्मि नमोऽस्तु ते ।
पद्माटविनिलयने महालक्ष्मि नमोऽस्तु ते ।
व्यासादि दिव्यांगसंपूज्ये महालक्ष्मि नमोऽस्तु ते ।
जयलक्ष्मि सिद्धलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
राजमुद्रे विष्णुमुद्रे महालक्ष्मि नमोऽस्तु ते ।
सर्वार्थसाधकि नित्ये महालक्ष्मि नमोऽस्तु ते ।
हनुमद्शक्तिसंतुष्टे महालक्ष्मि नमोऽस्तु ते ।
महति गीतनादस्थे महालक्ष्मि नमोऽस्तु ते । 80
रतिरूपे रम्यरूपे महालक्ष्मि नमोऽस्तु ते ।
कामांगि काम्यजननि महालक्ष्मि नमोऽस्तु ते ।
सुधापूर्णे सुधारूपे महालक्ष्मि नमोऽस्तु ते ।
इंद्रवंद्ये देवलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
अष्टैश्वर्यस्वरूपिण्यै महालक्ष्मि नमोऽस्तु ते ।
धर्मराजस्वरूपिण्यै महालक्ष्मि नमोऽस्तु ते ।
रक्षोवरपुरिलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
रत्नाकरप्रभारम्ये महालक्ष्मि नमोऽस्तु ते ।
मरुत्पुरमहानंदे महालक्ष्मि नमोऽस्तु ते ।
कुबेरलक्ष्मि मातंगि महालक्ष्मि नमोऽस्तु ते । 90
ईशानलक्ष्मि सर्वेशि महालक्ष्मि नमोऽस्तु ते ।

ब्रह्मपीठे महापीठे महालक्ष्मि नमोऽस्तु ते ।
मायापीठस्थिते देवि महालक्ष्मि नमोऽस्तु ते ।
श्रीचक्रवासिनि कन्ये महालक्ष्मि नमोऽस्तु ते ।
अष्टभैरवसंपूज्ये महालक्ष्मि नमोऽस्तु ते ।
असिथांगपुरीनाथे महालक्ष्मि नमोऽस्तु ते ।
सिद्धलक्ष्मि महाविद्ये महालक्ष्मि नमोऽस्तु ते ।
बुद्धींद्रियादिनिलये महालक्ष्मि नमोऽस्तु ते ।
रोगदारिद्र्यशमनि महालक्ष्मि नमोऽस्तु ते ।
मृत्युसंतापनाशिन्यै महालक्ष्मि नमोऽस्तु ते । 100
पतिप्रिये पतिव्रते महालक्ष्मि नमोऽस्तु ते ।
चतुर्भुजे कोमलांगि महालक्ष्मि नमोऽस्तु ते ।
भक्ष्यरूपे भुक्तिधात्रि महालक्ष्मि नमोऽस्तु ते ।
सदाऽऽनंदमये देवि महालक्ष्मि नमोऽस्तु ते ।
भक्तिप्रिये भक्तिगम्ये महालक्ष्मि नमोऽस्तु ते ।
स्तोत्रप्रिये रमे रामे महालक्ष्मि नमोऽस्तु ते ।
रामनामप्रिये देवि महालक्ष्मि नमोऽस्तु ते ।
गंगाप्रिये शुद्धरूपे महालक्ष्मि नमोऽस्तु ते ।
विश्वभर्त्रि विश्वमूर्ते महालक्ष्मि नमोऽस्तु ते ।
कृष्णप्रिये कृष्णरूपे महालक्ष्मि नमोऽस्तु ते । 110
गीतारूपे रागमूर्ते महालक्ष्मि नमोऽस्तु ते ।
सावित्रि भूतसावित्रि महालक्ष्मि नमोऽस्तु ते ।
गायत्रि ब्रह्मगायत्रि महालक्ष्मि नमोऽस्तु ते ।
ब्राह्मि सरस्वति देवि महालक्ष्मि नमोऽस्तु ते ।
शुकपालिनि शुद्धांगि महालक्ष्मि नमोऽस्तु ते ।
वीणाधरस्तोत्रगम्ये महालक्ष्मि नमोऽस्तु ते ।
आज्ञाकारि प्राज्ञवंद्ये महालक्ष्मि नमोऽस्तु ते ।
वेदांगवनसारांगि महालक्ष्मि नमोऽस्तु ते ।
नादांतरासभूयिष्ठे महालक्ष्मि नमोऽस्तु ते ।
दिव्यशक्ति महाशक्ति महालक्ष्मि नमोऽस्तु ते । 120
नृत्तप्रिये नृत्तलक्ष्मि महालक्ष्मि नमोऽस्तु ते ।
चतुष्षष्ठिकलारूपे महालक्ष्मि नमोऽस्तु ते ।

सर्वमंगलसंपूर्णे महालक्ष्मि नमोऽस्तु ते ।
दिव्यगंधांगरागांगि महालक्ष्मि नमोऽस्तु ते ।
मुक्तिदे मुक्तिदेहस्थे महालक्ष्मि नमोऽस्तु ते ।
यज्ञसारार्थशुद्धांगि महालक्ष्मि नमोऽस्तु ते । 126

इति वैभवलक्ष्मी अर्चना समाप्ता ।